# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – 02-09-2012 अङ्काः–100

पूर्वाह्णे - 10-00 तः 1-00 पर्यन्तम् समयः–घण्टात्रयम्

**1 पञ्चानां एकवाक्येन उत्तरं लिखत ।** 5

1. सतां व्रतम् किम् ?
2. पार्वत्याः वपुः केन विभक्तं बभूव ?
3. कः कं उपहन्ति ?
4. अलका नाम केषां वसतिः ?
5. मातङ्गः स्वपूर्ववृत्तान्तं कस्मै अकथयत् ?
6. भीष्मस्य आशयं कः अपूरयत् ?
7. कः नारीणां परमो धर्मः ?
8. केशवदासो नाम ब्राह्मणः कुत्र प्रस्थितः ?

**2 पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

1. मधुमक्षिकाणां व्यवहारं वर्णयत ।
2. द्वितीयः ब्राह्मणपुत्रः किमर्थं 'धन्योस्मि' इति कथयति ?
3. राजा बकस्य किं प्रतिश्रुतवान् ? बकस्य दैनिकं बलिहरणं किम् ?
4. अर्जुनः किमर्थं पर्याकुलो बभूव ? कथं पुनर्नवो बभूव सः ?
5. चित्रगुप्तः किं किं दर्शयित्वा मातङ्गममुञ्चत् ?
6. यक्षः कीदृशः ? सः कुत्र वसतिं चक्रे ?
7. महात्मानां प्रकृतिः कीदृशी ?
8. कदा पशूनां पतिः अपरिग्रहोऽभूत् ?

**3 द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत ।** 8

1. भीष्मः कृष्णं किमाबभाषे ?

2. 'कुन्तीव परिशोचति' ? का परिशोचति स्पष्टयत ।
3. गौरीपतिः मातङ्गं स्वप्ने किमवदत् ?
4. भीष्मः केषां मध्यमः ? सः घटोत्कचं किमिति वर्णयति ?

**4 वाक्यत्रयं सप्रसङ्गं विशदयत ।** 9

1. नाब्धिः क्षुभ्यति न प्रसीदति ततो न क्षीयते नैधते ।
2. ननु पापाः न हन्तव्यो ब्राह्मणः ।
3. बकशिरसि नवनीतं निधाय तेन तं जिघृक्षति।
4. न खलु एकचक्रो रथो गच्छति ।
5. एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।

**5 द्वयोः भावं विशदयत ।** 8

1. तां पार्वतीत्याभिजनेन नाम्ना
   बन्धुप्रियां बन्धुजनो जुहाव।
   उमेति मात्रा तपसो निषिद्धा।
   पश्चादुमाख्यां सुमुखी जगाम।।

2. प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
   पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम्।
   स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानाम्
   शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम्।।

3. निखिलजगदधीशं सर्वधीसाक्षिभूतं
   शबलितगुणयोगात् कल्पिते विश्वरङ्गे ।
   निरवधिनवनाट्ये नर्तयन्तं नटन्तं
   प्रणमत विभुमाद्यं सूत्रधारं महान्तम्।।

**6 श्लोकद्वयं पूर्णं लिखत ।** 6

1) मातेव .......................................... कल्पलतेव विद्या ।।

2) प्रथमवयसि ............................................... विस्मरन्ति ।।

7 **एकस्य कवेः देशकालग्रन्थान् अधिकृत्य लिखत ।** 4

1) कालिदासः 2) नीलकण्ठदीक्षितः 3) दण्डी

8 **एकस्य लघुटिप्पणीं लिखत ।** 4

1) कुन्ती 2) भीष्मः

9 **चत्वारि पदानि वाक्ये योजयत ।** 4

1) पर्यायक्रमेण 2) मात्रा 3) ददर्श
4) बहुधा 5) रोचते 6) लब्ध्वा

10 **चतुर्णां पर्यायपदानि लिखत ।** 4

1) यामिनी 2) प्रत्यूहः 3) अब्धिः
4) सुधाकरः 5) आयोधनम् 6) रथः

11 **चतुर्णां रूपाणि विवेचयत ।** 4

1) विवस्वान् 2) वर्त्मनि 3) पस्पर्श
4) हन्तव्यः 5) प्रयान्तः 6) व्रजसि

12 **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

1) भूतबलिः 2) आमुक्ति 3) समरशौण्डीरः
4) गिरवनजलपुष्पैः 5) त्रिभुवनजयी 6) नीलोत्पलम्

13 **चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

1) अणुरपि 2) तावदेनम् 3) सहसागत्य
4) सोऽपि 5) खल्वेषः 6) चिन्मयः

14 **द्वयोः तत्तल्लकारं पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

1) अवोचत् 2) ददर्श
3) सेविष्यते 4) गम्यताम्



पश्चादनुवर्तते

**15** **द्वयोः व्याकरणविशेषं लिखत ।** 4

1) नगाधिराजः 2) मा भूः 3) वैराटिः

**16** **समासमेकं सलक्षणं विशदयत ।** 3

1) द्वन्द्वः 2) कर्मधारयः

**17** **इतर वचनरूपाणि लिखत ।** 3

1) त्वाम् — —

2) — — शरीरिणाम्

3) — — द्विषः

**18** **द्वयोः प्रयोग परिवर्तनं कुरुत ।** 2

1) अस्माभिः स्थास्यते ।

2) अहम् अलज्जे ।

3) कीदृशः मनुष्यः आनीतः ?

**19** **रिक्तस्थानं पूरयत ।** 4

1) स्थितः पृथिव्याः ——— ।

2) सहसा ——— न क्रियाम् ।

3) याच्ञा मोघा वरमधिगुणे ———।

4) ——— संवर्ध्य स्वयमेवच्छेत्तुमीहते।

**20** **चतुर्थं पदं लिखत ।** 4

1) किरातार्जुनीयम् ; भारविः – मध्यमव्यायोगः …………।

2) कुन्ती ; भीमः – हिडिम्बा …………।

3) सुशब्दः ; शोभनः – शब्दः …………।

4) भीष्मः ; गाङ्गेयः – कर्णः …………।

* * * *

# श्री सुरसरस्वती सभा शृङ्गेरि
## तुरीया परीक्षा
### द्वितीयपत्रिका

दिनाङ्कः – 02-09-2012 | अङ्काः–50

अपराह्ने - 1-30 तः 3-00 पर्यन्तम् | समयः–सार्धैकहोरा

1 अ) विषयमेकमधिकृत्य दशभिः वाक्यैः संस्कृतभाषायां प्रबन्धं लिखत - 5

1) संस्कृतभाषायाः महत्वम् 2) परिसरः 3) ग्रन्थालयः

आ) सप्तमीविभक्तिः कदा प्रयुज्यते ? सोदाहरणं विशदयत । 5

2 प्रयोगाः कति ? नामानि लिखत। कर्तरीप्रयोगं विशदयत । 5

अथवा

काव्यं नाम किम् ? कति विधाः अर्थाः ? तान् विशदयत ।

3 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6

1. जीयात् 2. अलप्स्यत
3. वर्धिता 4. युज्यते

4 रूपकालङ्कारं सोदाहरणं विशदयत । 3

5 "निष्कम्ब वृक्षं निभृतद्विरेफं" – अत्रत्यं वृत्तं सप्रस्तारं सलक्षणं च निरूपयत । 3

6 उत्तरयत । 5

1. वसन्ततिलकावृत्ते कति अक्षराणि भवन्ति ?
2. कर्मणिप्रयोगे कर्मपदं कस्यां विभक्तौ भवति ?
3. 'स्थितः पृथिव्याः इव मानदण्डः' अत्र कोऽलङ्कारः ?
4. 'अलं' इतिपदम् उपयुज्य वाक्यं लिखत ।
5. एतयोः अन्यलिङ्गरूपम् लिखत । 1) स्वसा 2) महिषी

7 प्रयोग परिवर्तनं कुरुत । (त्रयाणामेव) 3

1. यदा सूर्येण प्रकाश्यते तदा नश्यते तमसा।



पश्चादनुवर्तते

2. शिशुः क्षीरं पिबति ।
3. तेन शाला गम्यते ।
4. अहं आसने उपविशामि ।

**8 वाक्यदोषं परिहरत ।** 5

1. पिता पुत्रस्य साकं गच्छति ।
2. गृहस्य परितः वृक्षाः सन्ति ।
3. बालकः व्याघ्रेण भीतः ।
4. श्रीकृष्णं नमः ।
5. हरिः वैकण्ठे अधिवसति ।

**9 स्वोत्तरभाषया अनुवदत ।** 5

1. अन्तरेण गुरुशश्रूषां विद्या नावाप्यते ।
2. जम्बुकः 'द्राक्षफलानि आम्लानि' इति दूषयित्वा अन्यत्र अगच्छत् ।
3. छात्राः! यूय सदा परेषां हितमेव कुरुत ।
4. राष्ट्रपतिः देहलीनगरमध्यास्ते ।
5. श्रीरामः सर्वान् अपि निशाचरान् हन्तुं शक्नोति ।

**10 संस्कृतेनानुवदत ।** 5

1) ಮಕ್ಕಳೇ, ಹಣ್ಣನ್ನು ತಿಂದು ಹಾಲು ಕುಡಿಯಿರಿ.
Children, drink milk after eating the fruit.
2) ಒಂದು ಗ್ರಾಮದಲ್ಲಿ ದೀನನಾದ ಒಬ್ಬ ಬ್ರಾಹ್ಮಣನು ವಾಸಿಸುತ್ತಿದ್ದನು.
A poor Brahmin was living in a village.
3) ವಿದ್ಯಾರ್ಥಿಗಳಲ್ಲಿ ರಾಮನು ಶ್ರೇಷ್ಠನು.
Among the students, Rama is the best.
4) ನವರಾತ್ರಿಯ ಉತ್ಸವದಲ್ಲಿ ನಾವು ಶೃಂಗೇರಿಗೆ ಹೋಗುವೆವು.
We will go to Sringeri during Navaratri festvals.
5) ಸಜ್ಜನರು ಎಂದಿಗೂ ಸದಾಚಾರವನ್ನು ಬಿಡುವುದಿಲ್ಲ.
Noble people will never give up the noble conduct.

* * * * *